# ॥ માઙ્ગલ્યસ્તવઃ ॥

.. mA NgalyastavaH ..

sanskritdocuments.org

August 2, 2016

# .. mANgalyastavaH ..

# ॥ માઙ્ગલ્યસ્તવઃ ॥

## Document Information

Text title : mAngalyastavaH
File name : mAngalyastava.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : N.Balasubramanian bbalu at satyam.net.in
Proofread by : N.Balasubramanian bbalu at satyam.net.in
Translated by : N.Balasubramanian bbalu@satyam.net.in
Description-comments : viShNudharmottarAntargata
Latest update : November 27, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ માઙ્ગલ્યસ્તવઃ ॥

This stotram consists of fifty verses and forms the 43rd chapter of Sri Vishnudharmottara samhita. This is structured in the form of the
answer given by sage Pulastya in reply to a question by sage Dhalbya.
The first two verses form Dhalbya's question and what follows form Pulastya's answer. Verses 3 and 4 state the benefits of thinking about the Lord and glory of this stotra. The next eight verses sing the glory of the Lord.They say that He is the creator of the universe: He gives liberation to His devotees and there is none to equal or excel Him. The next eight verses (No.13 to 20) praise the Lord who took the form of a boar. Verses No.21 to 28 are in praise of
Lord Narasimha.Verses No.29 to 35 are in praise of Lord Vamana - in
His dwarfish form and are followed by one verse each about Hayagriva,
Parasurama, Rama and Krishna. Then follow a verse on the fom of the
Lord to be meditated upon in the morning hours, a verse on His form
for meditation during the noon, a verse for meditation in the afternoon and one verse for meditation at all times.These are followed by two verses that give the palasruti or benefit of reciting this stotra . The next two verses contain an assurance that by worshipping the Lord one can get all his wishes fulfilled. The next verse No.47 cites some instances from the puranas to substantiate the
statement. The last three verses mention the greatness of this stotram.

Great acharyas like Sri Parasara Bhattar and Sri Vedanta Desika had
quoted from this stotram. This fact attests the greatness of the

stotram and lends authrity to it. Devotees may, therefore include this stotram along with other verses in their daily prayer.

દાલ્ભ્યઃ -

કાર્યારંભેષુ સર્વેષુ દુઃસ્વપ્નેષુ ચ સત્તમ ।
અમાઙ્ગલ્યેષુ દૃષ્ટેષુ યજ્જપ્તવ્યં તદુચ્યતામ્ ॥ ૧॥

યેનારંભાશ્ચ સિદ્ધ્યન્તિ દુઃસ્વપ્નશ્ચોપશામ્યતિ ।
અમઙ્ગલાનાં દૃષ્ટાનાં પરિહારશ્ચ જાયતે ॥ ૨॥

શ્રી પુલસ્ત્યઃ:-

જનાર્દનં ભૂતપતિં જગદ્ગુરું સ્મરન્ મનુષ્યઃ સતતં મહામુને ।
દુષ્ટાન્યશેષણ્યપહન્તિ સાધયતિ અશેષકાર્યાણિ ચ યાન્યભીપ્સતિ ॥ 3 ॥

શૃણુષ્વ ચાન્યત્ ગદતો મમાખિલં વદામિ યત્ તે દ્વિજવર્ય! મઙ્ગલમ્ ।
સર્વાર્થસિદ્ધિં પ્રદદાતિ યત્ સદા નિહન્ત્યશેષાણિ ચ પાતકાનિ ॥ ૪॥

પ્રતિષ્ઠિતં યત્ર જગચ્ચરાચરં જગત્ત્રયે યો જગતશ્ચ હેતુઃ ।
જગચ્ચ પાત્યત્તિ ચ યઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૫॥

વ્યોમામ્બુવાય્વગ્નિમહીસ્વરૂપૈઃ વિસ્તારવાન્ યોઽણુતરોઽણુભાવાત્ ।
અસ્થૂલસૂક્ષ્મઃ સતતં પરેશ્વરો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૬॥

યસ્માત્ પરસ્માત્ પુરુષાદનન્તાત્ અનાદિમધ્યાદધિકં ન કિંચિત્ ।
સ હેતુહેતુઃ પરમેશ્વરેશ્વરઃ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૭॥

હિરણ્યગર્ભાચ્યુતરુદ્રરૂપી સૃજત્યશેષં પરિપાતિ હન્તિ ।
ગુણાગ્રણીર્યો ભગવાન્ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૮॥

પરઃ સુરાણાં પરમોઽસુરાણાં પરો યતીનાં પરમો મુનીનામ્ ।
પરઃ સમસ્તસ્ય ચ યઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૯॥

ધ્યાતો મુનીનામપકલ્મષૈર્યો દદાતિ મુક્તિં પરમેશ્વરેશ્વરઃ ।
મનોભિરામઃ પુરુષઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૦॥

સુરેન્દ્રવૈવસ્વતવિત્તપામ્બુપસ્વરૂપરૂપી પરિપાતિ યો જગત્ ।
સ શુદ્ધશુદ્ધઃ પરમેશ્વરેશ્વરો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૧॥

યન્નામસઙ્કીર્તનતો વિમુચ્યતે હ્યનેકજન્માર્જિતપાપસઞ્ચયાત્ ।
પાપેન્ધનાગ્નિઃ સ સદૈવ નિર્મલો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૨॥

યેનોદ્ધૃતેયં ધરણી રસાતલાત્ અશેષસૃષ્ટિસ્થિતિકારણાદિકમ્ ।
બિભર્તિ વિશ્વં જગતઃ સ મૂલં મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૩ ॥

પાદેષુ વેદા જઠરે ચરાચરં રોમસ્વશેષા મુનયો  મુખે મખાઃ ।
યસ્યેશ્વરેશસ્ય સ સર્વદા પ્રભુઃ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૪॥

સમસ્ત યજ્ઞાઙ્ગમયં વપુઃ પ્રભોઃ યસ્યાઙ્ગમીશેશ્વરસંસ્તુતસ્ય ।
વરાહરૂપી ભગવાન્ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૫॥

વિક્ષોભ્ય સર્વોદધિતોયસંભવં દધાર ધાત્રીં જગતશ્ચ યો ભુવમ્ ।
યજ્ઞેશ્વરો યજ્ઞપુમાન્ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૬॥

પાતાલમૂલેશ્વરભોગિસંહતો વિન્યસ્ય પાદૌ પૃતિવીં ચ બિભ્રતઃ ।
યસ્યોપમાનં ન બભૂવ સોઽચ્યુતો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૭॥

સધર્ધરં યસ્ય ચ બૃંહિતં મુહુઃ સનન્દનાદ્યૈર્જનલોકસંશ્રિતૈઃ ।
શ્રુતં જયેત્યુક્તિપરૈઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૮॥

એકાર્ણવાદ્ યસ્ય મહીયસૌ મહીં આદાય વેગેન ખમુત્પતિષ્યતઃ ।
નતં વપુર્યોગિવરૈઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૯॥

હતો હિરણ્યાક્ષમહાસુરઃ પુરા પુરાણપુંસા પરમેણ યેન ।
વરાહરૂપઃ સ પતિઃ પ્રજાપતિઃ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૦॥

દંષ્ટ્રાકરાલં સુરભીતિનાશકં કૃતં વપુર્દિવ્યનૃસિંહરૂપિણા ।
ત્રાતું જગત્ યેન સ સર્વદા પ્રભુઃ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૧॥

દૈત્યેન્દ્રવક્ષઃસ્થલદારદારુણૈઃ
કરેરુહૈર્યઃ ક્રકચાનુકારિભિઃ ।
વિચ્છેદ લોકસ્ય ભયાનિ સોઽચ્યુતો
મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૨॥

દન્તાન્તદીપ્તદ્યુતિનિર્મલાનિ યઃ ચકાર સર્વાણિ દિશાં મુખાનિ ।
નિનાદવિત્રાસિતદાનવો હ્યસૌ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૩॥

યન્નામસંકીર્તનતો મહાભયાત્ વિમોક્ષમાપ્નોતિ ન સંશયં નરઃ ।
સ સર્વલોકાર્તિહરો નૃકેસરી મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૪॥

સટાકરાલભ્રમણાનિલાહતાઃ સ્ફુટન્તિ યસ્યાંબુધરાઃ સમન્તતઃ ।
સ દિવ્યસિંહઃ સ્ફુરિતાનલેક્ષણો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૫॥

યદીક્ષણજ્યોતિષિ રશ્મિમણ્ડલં પ્રલીનમીષન્ન રરાજ ભાસ્વતઃ ।
કુતઃ શશાઙ્કસ્ય સ દિવ્યરૂપધૃક્ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૬॥

અશેષદેવેશનરેશ્વરેશ્વરૈઃ સદા સ્તુતં યચ્ચરિતં મહાદ્ભુતમ્ ।
સ સર્વલોકાર્તિહરો મહાહરિઃ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૭॥

દ્રવન્તિ દૈત્યાઃ પ્રણમન્તિ દેવતાઃ નશ્યન્તિ રક્ષાંસિ અપયાન્તિ ચારયઃ ।
યત્કીર્તનાત્ સોઽદ્ભુતરૂપકેસરી મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૮॥

ઋક્પાવિતં યો યજુષા હિ શ્રીમત્ સામધ્વનિધ્વસ્તસમસ્તપાતકમ્ ।
ચક્રે જગત્ વામનકઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૯॥

યત્પાદવિન્યાસપવિત્રતાં મહી યયૌ વિયચ્ચર્ગ્યજુષામુદીરણાત્ ।
સ વામનો દિવ્યશરીરરૂપદૃઙ્ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૦॥

યસ્મિન્ પ્રયાતેઽસુરભૂભૃતોઽધ્વરાત્ નનામ ખેદાદવનિઃ સસાગરા ।
સ વામનઃ સર્વજગન્મયઃ સદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૧॥

મહાદ્ભુતે દૈત્યપતેર્મહાધ્વરે યસ્મિન્ પ્રવિષ્ટે ક્ષુભિતં મહાસુરૈઃ ।
સ વામનોઽન્તસ્થિતસપ્તલોકધૃઙ્ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૨॥

સંઘૈઃ સુરાણાં દિવિ ભૂતલસ્થિતૈઃ તથા મનુષ્યૈર્ગગને ચ ખેચરૈઃ ।
સ્તુતઃ ક્રમાદ્ યઃ પ્રચ્ચાર સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૩॥

ક્રાન્ત્વા ધરિત્રીં ગગનં તથા દિવં મરુત્પતેર્યઃ પ્રદદૌ ત્રિવિષ્ટપમ્ ।
સ દેવદેવો ભુવનેશ્વરેશ્વરો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૪॥

અનુગ્રહં ચાપિ બલેરનુત્તમં ચકાર યશ્ચેન્દ્રપદોપમં ક્ષણાત્ ।
સુરાંશ્ચ યજ્ઞાંશભુજઃ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૫॥

રસાતલાદ્ યેન પુરા સમાહૃતાઃ સમસ્તવેદા જલચારરિરૂપિણા ।
સ કૈટભારિમધુહાઽમ્બુશાયી મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૬॥

નિઃક્ષત્રિયં યશ્ચ ચકાર મેદિનીં અનેકશો બાહુવનં તથાઽચ્છિનત્ ।
યઃ કાર્તવીર્યસ્ય સ ભાર્ગવોત્તમો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૭॥

નિહત્ય યો વાલિનમુગ્રવિક્રમં
નિબદ્ધ્ય સેતું જલધૌ દશાનનમ્ ।
જઘાન ચાન્યાન્ રજનીચરાન્ અસૌ
મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૮॥

ચિક્ષેપ બાલઃ શકટં, બભઞ્જ યો યમાર્જુનં, કંસમરિં જઘાન ચ ।
મમર્દ ચાણૂરમુખાન્ સ સર્વદા મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૯॥

પ્રાતઃ સહસ્રાંશુમરીચિનિર્મલં કરેણ બિભ્રત્ ભગવાન્ સુદર્શનમ્ ।
કૌમોદકી ચાપિ ગદામનન્તો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૦॥

હિમેન્દુકુન્દસ્ફટિકાભનિર્મલં મુખાનિલાપૂરિતમીશ્વરેશ્વરઃ ।
મધ્યાહ્નકાલેઽપિ સ શન્ખમુદ્વહન્ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૧॥

તથાપરાહ્ને પ્રવિકાસિ પઙ્કજં વક્ષસ્થલેન શ્રિયમુદ્વહન્ હરિઃ ।
વિસ્તારિપદ્માયતપત્રલોચનો મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૨॥

સર્વેષુ કાલેષુ સમસ્તદેશેષુ અશેષકાર્યેષુ તથેશ્વરેશ્વરઃ ।
સર્વૈઃ સ્વરૂપૈર્ભગવાન્ અનાદિમાન્ મમાસ્તુ માઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૩ ॥

એતત્ પઠન્ દાલ્ભ્ય સમસ્તપાપૈઃ
વિમુચ્યતે વિષ્ણુપરો મનુષ્યઃ ।
સિદ્ધ્યન્તિ કાર્યાણિ તથાઽસ્ય સર્વાન્
અર્થાનવાપ્નોતિ યથેચ્છતે તાન્ ॥ ૪૪॥

દુઃસ્વપ્નઃ પ્રશમમુપૈતિ પઠ્યમાને
સ્તોત્રેઽસ્મિન્ શ્રવણવિધૌ સદોદ્યતસ્ય ।
પ્રારમ્ભો દ્રુતમુપયાતિ સિદ્ધિમીશઃ
પાપાનિ ક્ષપયતિ ચાસ્ય દેવદેવઃ ॥ ૪૫॥

માઙ્ગલ્યં પરમપદં સદાઽર્થસિદ્ધિં
નિર્વિઘ્નામધિકફલાં શ્રિયં દદાતિ ।
કિં લોકે તદિહ પરત્ર ચાપિ પુંસાં
યદ્વિષ્ણુપ્રવણધિયાં ન દાલ્ભ્ય! સાધ્યમ્ ॥ ૪૬॥

દેવેન્દ્રસ્ત્રિભુવનમર્થમેકપિંગઃ
સંસિદ્ધિં ત્રિભુવનગાં ચ કાર્તવીર્યઃ ।
વૈદેહઃ પરમપદં પ્રસાદ્ય વિષ્ણું
સંપ્રાપ્તાઃ સકલફલપ્રદો હિ વિષ્ણુઃ ॥ ૪૭॥

સર્વારમ્ભેષુ દાલ્ભ્યૈતદ્ દુઃસ્વપ્નેષુ ચ પણ્ડિતઃ ।
જપેદેકમના વિષ્ણૌ તથાઽમઙ્ગલ્યદર્શને ॥ ૪૮॥

શમં પ્રયાન્તિ દુષ્ટાનિ ગ્રહપીડાશ્ચ દારુણાઃ ।
કર્મારમ્ભાશ્ચ સિદ્ધ્યન્તિ પુણ્યમાપ્નોતિ ચોત્તમમ્ ॥ ૪૯॥

હરિર્દદાતિ ભદ્રાણિ મઙ્ગલ્યસ્તુતિસંસ્તુતઃ ।
કરોત્યખિલરૂપૈસ્તુ રક્ષામક્ષતશક્તિભૃત્ ॥ ૫૦॥

॥ શ્રીવિષ્ણુધર્મોત્તરાન્તર્ગતઃ માઙ્ગલ્યસ્તવઃ સંપૂર્ણઃ ॥

Encoded and proofread by N. Balasubramanian bbalu at satyam.net.in

.. mANgalyastavaH ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com